# UNIVERSITY OF NORTH BENGAL

B.A. Honours 2nd Semester Examination, 2019

## CC3-SANSKRIT (203)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### विभागः—'क'

1. एकस्य प्रश्नस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) भारतीयसंस्कृतौ साहित्ये च रामायणस्य गुरुत्वम् आलोचनीयम्।

(ख) किं नाम ऐतिहासिककाव्यम् ? संस्कृतभाषया विरचितानाम् ऐतिहासिककाव्यानां विवरणं लिखत।

2. संस्कृतभाषया देवनागरीलिप्या च टिप्पणी कार्या (द्वयोः) – 6×2 = 12

अष्टाङ्ग–आयुर्वेदः; मुद्राराक्षसम्; लीलावती।

3. संक्षिप्तोत्तरं लेखनीयम् (द्वयोः) – 3×2 = 6

(क) 'पञ्चतन्त्रम्' इति ग्रन्थस्य कः रचयिता ? ग्रन्थेऽस्मिन् कति ग्रन्थभेदाः ? नामानि लेखनीयानि।

(ख) जुनागड़शिलालेखस्य कः रचयिता ? अस्य विषयः कः ?

(ग) रचयितुः नामोल्लेखपूर्वकं संस्कृतभाषया विरचितयोः द्वयोः प्रकरणयोः नाम लिखत।

### विभागः—'ख'

4. एकस्य प्रश्नस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) किं नाम संवादसूक्तम् ? ऋग्वेदीयसंवादसूक्तम् आधारीकृत्य नातिदीर्घः प्रबन्धः लिख्यताम्।

(ख) कति वेदाङ्गानि सन्ति ? तेषां स्वरूपं प्रयोजनं च आलोचयत।

5. संस्कृतभाषया देवनागरीलिप्या च टिप्पणी कार्या (द्वयोः) – 6×2 = 12

आचार्यः सायणः; छान्दोग्योपनिषद्; बृहद्देवता।

6. संक्षिप्तोत्तरं प्रदेयम् (द्वयोः) – 3×2 = 6

(क) शतपथब्राह्मणम् कस्मिन् वेदे अन्तर्भवति ? अस्य नामकरणस्य तात्पर्यं किम् ?

(ख) सामवेदस्य मुख्यभागाः कति ? नामानि लेखनीयानि।

(ग) ब्राह्मणग्रन्थस्य प्रतिपाद्यविषयाः कति ? तेषां नामानि लिखत।

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 2nd Semester Examination, 2019

## CC4-SANSKRIT (204)

Time Allotted: 2 Hours — Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### Unit-I

1. एकस्य विभागस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम् – 12×1 = 12

क-विभागः

चतुर्णां सूत्राणां व्याख्या कार्या –

कृत्यल्युटो बहुलम्; ऋहलोर्ण्यत्; कालसमयवेलासु तुमुन्; स्त्रीभ्यो ढक्; कन्यायाः कानीन च; तस्मै हितम्।

ख-विभागः

चतुर्णां सूत्राणां व्याख्या कार्या –

कर्मण्यण्; समानकर्तृकयोः पूर्वकाले; स्त्रियां क्तिन्; अत इञ्; तेन प्रोक्तम्; किति च।

2. संस्कृतभाषया देवनागरीलिप्या च ससूत्रं पदसाधनं कुरुत (द्वयोः विभागयोः) – 6×2 = 12

(क) कारकः ; कृतिः।

(ख) शैवः ; शुष्कः।

(ग) सभ्यः ; दानीयः।

3. संस्कृतभाषया देवनागरीलिप्या च परिणतरूपं लेखनीयम् (द्वयोः विभागयोः) – 3×2 = 6

(क) भिद् + क्त; युष्मद् + छ; आ–दा + ल्यप्।

(ख) त्यज् + ण्यत्; गङ्गा + अण्; प्रशस्य + इष्ठन्।

(ग) पी + क्त्वा; क्षत्र + घ; गम् + शतृ।

### Unit-II

4. एकस्योत्तरं प्रदेयम् – 12×1 = 12

(क) कः आसीत् विहारभद्रः ? सः अनन्तवर्माणं प्रति यदुपदिशति तत् सर्वं विश्रुतचरितानुसारं सविशदमालोचयत।

(ख) "बाणोच्छिष्टं जगत् सर्वम्"– उक्तेरस्याः याथार्थ्यं व्याख्येयम्।

5. अधोलिखितेषु द्वयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः – 6×2 = 12

(क) अथ सोऽप्याचचक्षे– "देव! मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लेशार्हः क्वचित्कूपाभ्याशेऽष्टवर्षदेशीयो दृष्टः।" स च त्रासगदगदमगदत्– "महाभाग! क्लिष्टस्य मे क्रियतामार्थ साहाय्यकम्। अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चन्निहकूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः। तमलमस्मि नाहमुद्धर्तुम्" इति।

(ख) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झित धवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदूरन्तेयमुपभोगमृगतृष्णिका।

(ग) मनसा देवताध्यारोपणप्रतारणासम्भूतसम्भावनोपहताश्च आन्तः प्रविष्टापरभूजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते। दर्शनप्रदानमप्यनुग्रहं गणयन्ति, दृष्टिपातमप्युपकारपक्षे स्थापयन्ति, सम्भाषणमपि संविभागमध्ये कुर्वन्ति, आज्ञामपि वरप्रदानं मन्यन्ते, स्पर्शमपि पावनमाकलयन्ति।

6. संस्कृतभाषया देवनागरीलिप्या च संक्षिप्तोत्तरं प्रदेयम् (द्वयोः) – 3×2 = 6

(क) शुकनासोपदेश इति पाठ्यांशः कस्मिन् ग्रन्थे अन्तर्भवति ? ग्रन्थस्यास्य कः रचयिता ? ग्रन्थकारेण विरचितस्य अपरग्रन्थस्य नाम किम् ?

(ख) कति राजविद्याः ? तासां नामानि लेखनीयानि।

(ग) "विरला हि तेषामुपदेष्टारः"–
उद्धृतिरियं कस्मिन् ग्रन्थे लभ्यते ? कस्य उक्तिरियम् ? कं प्रति वक्तुः इयमुक्तिः ?

——×——